**अघ** न० चुरा० अघ-भावे अच् । पापे "हरत्यघं सम्प्रति हेतुरेष्यत" इति माघः । कर्त्तरि अच् । पापकारके त्रि० "अघायुरिन्द्रियारामो मोघं पार्थ ! स जीवतीति" गीता अघं हेतुत्वेनास्त्यस्य अर्श० अच् । व्यसने दुःखे च न० तयोः पापजन्यत्वात्तत्त्वम् । तत्र व्यसने "कच्चित् मृगीणामनघा प्रसूतिरिति" रघुः । "अनघा अव्यसनेति" मल्लिनाथः । "न वर्द्धयेदघाहानीति" "अघाहेषु निवृत्तेषु सुस्नाताः कृतमङ्गला इति" च स्मृतिः अघस्य व्यसनस्य इष्टवियोगरूपस्य तज्जन्यदुःखस्य वा अहानि अघाहाइति तदर्थः । दुःखे, "उपप्लुतमघौघेन नात्मानमवबुध्यते इति" दुःखौघेनेत्यर्थः "दयालुमनघस्पृष्टं पुराणमजरं विदुरिति" माघः । परदुःखेन दुःखित्वे एव तत्प्रहरणाय दयालोरिच्छा, ईश्वरस्य तु दयालुत्वेऽपि न दुःखस्पर्शः आनन्दस्वरूपत्वादिति, तत्तात्पर्य्यार्थः "स्वयशांसि विक्रमवतामवतां न बधूष्वघानि इति भा० । अघानि व्यसनानीत्यर्थः । पूतनाबकासुरयोर्भ्रातरि असुरभेदे पु० । "कृष्णचरितमिवाघनाशनमिति" श्लेषः । एतत्कथा चाघनाशनशब्दे द्रष्टव्या ।

**अघकृत्** त्रि० अघं पापं सततं करोति कृ-कर्त्तरि ताच्छीलादिषु वा क्विप् इत० । पापकारिणि, सततपापशीले च ।

**अघन** त्रि० न०त० । निविडताविरुद्धशैथिल्ययुक्ते ।

**अघनाशन** त्रि० अघं नाशयति नश-णिच्-ल्यु । पापनाशके जप्यदानादौ "जपेत् सर्व्वाघनाशनमिति" स्मृतिः । स्त्रियां ङीप् । अघस्यासुरभेदस्य नाशनः । श्रीकृष्णे, स हि अजगररूपेण जिघांसन्तं तं हतवान् तत्कथा भागवते "अथाघनामाभ्यपतन्महासुरस्तेषां सुखक्रीड़नवीक्षणाक्षमः । नित्यं यदन्तर्निजजीवितेप्सुभिः पीतामृतैरप्यमरैः प्रतीक्ष्यते ॥ दृष्ट्वार्भकान् कृष्णमुखानघासुरः कंसानुशिष्टः स बकीबकानुजः । अयन्तु मे सोदरनाशकृत्तयोर्द्वयोर्म्ममैनं सबलं हनिष्ये। एते यदस्मत्सुहृदोस्तिलापाः कृतास्तदा नष्टसमा व्रजौकसः । प्राणे गते वर्ष्मसु कानुचिन्ता प्रजासवः प्राणभृतो हि संयते ॥ इति व्यवस्याजगरं बृहद्वपुः स योजनायाममहाद्रिपीवरम् । धृत्वाद्भुतं व्यात्तगुहाननं तदा पथि व्यशेत ग्रसनाशया खलः" ॥ इत्यम् अघनामकेऽसुरे स्थिते तदुदरे गोवत्सवत्सपालेषु गतेषु स्वयमपि हरिः प्रविश्य अत्यन्तं स्वदेहवर्द्धनेन तं हतवान् इत्यप्युक्तम् । "तच्छ्रुत्वा भगवान् कृष्णस्त्वव्ययः सार्भवत्सकम् । चूर्णीचिकीर्षोरात्मानं तरसा ववृधे गले ॥ ततोऽतिकायस्य निरुद्धमार्गिणो ह्युद्गीर्णदृष्टेर्भ्रमतस्त्वितस्ततः । पूर्णोऽन्तरङ्गे पवनो निरुद्धो मूर्द्धन् विनिर्भिद्य विनिर्गतो वहिः" इति ॥ "कृष्णचरितमिवाघनाशनमिति" श्लेषः ।

**अघभोजिन्** त्रि० अघं पापफलकं भुङ्क्ते भुज-णिनि इत० । देवपित्रतिथ्युद्देशाभावेन स्वार्थपाचके । "अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्" इति विष्णुः । "भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्" इति गीता ।

**अघमर्षण** न० अघं पापं मृष्यते उत्पन्नत्वेऽपि नाशनेन कर्म्माक्षमत्वात् सह्यतेऽनेन मृष-ल्युट् इत० । उत्पन्नपापनाशार्थं जप्ये मन्त्रभेदे तच्च द्रुपदादिवेत्यादि, ऋतञ्च सत्यञ्चेत्यादि आपोहिष्ठेत्यादि सूक्तञ्च । तच्च अन्तर्जले जप्यम् तत्फलञ्चोक्तं प्रायश्चित्ततत्त्वधृते ब्राह्मणसर्वस्वे । यथा "बौधायनः "ऋतञ्च सत्यञ्चाद्यघमर्षणम् त्रिरन्तर्जले जपन् सर्व्वस्मात् पापात् प्रमुच्यते" । योगियाज्ञवल्क्यः "हत्वा लोकानिमांस्त्रीन् हि त्रिः पठेदघमर्षणम् । यथाश्वमेधावभृथमेवं तन्मनुरब्रवीत्" इति । हारीतः "पातकोपपातकमहापातकानामेकतमसन्निपातेऽघमर्षणमेव जपेत्" इति । बृहद्विष्णुः "यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः । तथाघमर्षणं सूक्तं सर्व्वपापप्रणाशनम्" इति । योगियाज्ञवल्क्यः "स्नानमब्दैवतैर्मन्त्रैर्मार्जनं प्राणसंयमः । अघमर्षणसूक्तेन अश्वमेधावभृत्समम्" इति । शङ्खः "जलनिमग्नः प्राणान् संयम्य त्रिरावृत्ताघमर्षणसूक्तेन स्नायात् नास्त्यघमर्षणात् परमन्तर्ज्जले" इति । गौतमः "अन्तर्जलेऽघमर्षणं त्रिरावर्त्तयन् सर्व्वपापेभ्यो मुच्यते" इति। अत्रिः "अपि चाप्सु निमज्जित्वा त्रिः पठेदघमर्षणम् । यथाश्वमेधावभृथं तथैतन्मनुरब्रवीत्" इति । वशिष्ठः "अपि चाप्सु निमज्जानः त्रिः पठेदघमर्षणम् । यथाश्वमेधावभृथं तादृशं मनुरब्रवीत्" इति । आपस्तम्बः "अपि चाप्सु निमज्जित्वा त्रिः पठेदघमर्षणम्" । यथाश्वमेधयज्ञो हि मनुस्तादृशमाह तत्" इति । बौधायनः "त्रिरात्रं चाप्युपवसन् त्रिरह्नाभ्युपयन्नपः । प्राणानप्सु नि संयम्य त्रिः पठेदघमर्षणम् । "यथाश्वमेधावभृथमेवं तन्मनुरब्रवीत्" इति । योगियाज्ञवल्क्यः "त्र्यहं चोपवसेद् यस्तु त्रिरह्नोऽभ्युपयन्नपः । मुच्यते पातकैः सर्व्वैः जप्त्वा त्रिरघमर्षणम्" इति । रहस्ये बृहन्मनुः "मातरं भगिनीं गत्वा मातृस्वसारं स्नुषां सखीं सनाभ्याञ्च अगमप्रागमनं कृत्वा अघमर्षणम् अन्तर्जले त्रिरावर्त्त्य एतस्मात् पापात् पूतो भवतीति" । तथा "गुरुतल्पगमनं कृत्वा अघमर्षणमन्तर्ज्जले त्रिरावर्त्त्य एतस्मात् पापात् पूतो